# संस्कृत-वार्ता:

दिनाङ्क : 24/01/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- प्रधानमंत्री श्री नरेन्द्रमोदी रोजगार मेला इति उपक्रमे एकषष्टीसहस्रयुवभ्य: नियुक्तिपत्राणि प्रदत्तवान्।
- यूरोपीय आयोगस्य उपाध्यक्षा यूरोपीय संघस्य विदेश प्रकरणानां सुरक्षा नीतेः च उच्चप्रतिनिधि: काजा कल्लासः इत्येषा अद्य प्रातःकाले स्वीय भारतस्य प्रथमाधिकारिकयात्रायां सम्प्राप्तवती।
- जम्मू-कश्मीर्-प्रदेशे, रक्षासैन्यबलेन कठुवा-जनपदस्य बिलावर-क्षेत्रे जैश्-ए-मोहम्मद् इत्यस्य आतङ्की-सेनापतिः पाकिस्तानी-आतङ्कवादी उस्मान् उत अबू माविया मारितः। \
- अद्य अन्तारार्ष्ट्रीय बालिका दिवस: विश्विस्मन् हि विश्वे आचर्यते।
- अण्डर-19 पुरूष-विश्वकप-क्रिकेट् क्रीडायां न्यूजीलैण्ड-दलेन सह भारतं स्पर्धते।

------------------------------------

<u>प्रधानमंत्री</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना समुदीरितं यत् प्रशासनं देशे-विदेशे च यूनां कृते नूत्नावसराणां सृजने प्रयासरतो विद्यते। तेनोक्तं यत् भारतं सम्प्रति विभिन्नै: देशै: सह व्यापारे आवागमने च संधिं करोति येन हि कुशलयुवभ्य: अवसरा: उद्घाटिता: भवेयु:। प्रधानमन्त्रिणा एतत् अद्य नवदिल्ल्यां आयोजिते अष्टादशतमे "राष्ट्रीय-रोजगार- मेला" कार्यक्रमे आभासीय-माध्यमेन उक्तम्।

देशस्य सुदृढार्थव्यवस्थाया: विषये भाषमान: श्री मोदी अवोचत् यत् एषा विश्वस्य एकमात्र-अर्थव्यवस्था वर्तते, यया विगतैकवर्षे जी.डी.पी. द्विगुणितं कृतम्।

जनवरी मासस्य चतुर्विंशतिदिनाङ्कस्य महत्वस्य विषये भाषमान: श्री मोदिना कथितं यत् अयं स एव दिवस: यदा संविधाने ''जन-गण-मन'' राष्ट्रगानत्वेन सममेव 'वंदे मातरम्' राष्ट्रगीतत्वेन मान्यता प्रदत्ता।

रोजगार मेलाया: विषये कथयन् प्रधानमन्त्री श्री मोदी अब्रवीत् यत् रोजगार मेला अधुना संस्थागत् वर्तते अपि च लक्षाधिका: युवान: नैकेषु सर्वकीय विभागेषु नियुक्तिपत्राणि च प्राप्नुवन्।

असौ एतत् अपि उक्तवान् यत् षड्विंशत्यधिक द्विसहस्रतमवर्षस्य आरम्भ: प्रत्यग्रस्य प्रसन्नतया: प्रतीको वर्तते ,यत् सम्प्रति एव वसंतपंचमी उत्सव: समाचरितम्।

------------------------------------

## प्रधानमन्त्री मन की बात

प्रधानमन्त्री नरेन्द्र-मोदी श्व: प्रातः एकादशवादने आकाशवाणीतः 'मन की बात' इति कार्यक्रमे स्वीयं मनोगतं प्रकटयिष्यति। मासिकस्य आकाशवाणी-कार्यक्रमस्य एतत् त्रिंशत्यधिकैकशततमं संस्करणं भविष्यति। आकाशवाण्याः दूरदर्शनस्य च सर्वाभिः वाहिनीभिः अस्य कार्यक्रमस्य प्रसारणं भविष्यति।

------------------------------------

## यूरोपीय;आयोगस्य उपाध्य

यूरोपीय आयोगस्य उपाध्यक्षा यूरोपीय संघस्य विदेश प्रकरणानां सुरक्षा नीतेः च उच्चप्रतिनिधि: काजा कल्लासः इत्येषा अद्य प्रात:काले स्वीय भारतस्य प्रथमाधिकारिकयात्रायां सम्प्राप्तवती। विदेशमन्त्रालयस्य प्रवक्ता रणधीर जायसवालः सामाजिकान्तर्जालीये सन्देशे अवदत् यत्, भारत-यूरोपीयसङ्घयोः सामरिकसहभागित्वम् इतोपि सुदृढंकर्तुं उपयुक्तसमये इयं यात्रा अस्ति। सः अवदत् यत् सुश्री कल्लास-इत्यस्याः यात्रा भारत-यूरोपीय-सङ्घयोः मध्ये नियमित-उच्च-स्तरीय-संवादस्य गतिं वर्धयिष्यति। यूरोपीय-आयोगस्य अध्यक्षस्य उर्सुला वॉन डेर लेयेन इत्यस्य, यूरोपीय-परिषदः अध्यक्षस्य एन्तोनियो कोस्टा इत्यस्य च भारतयात्रायाः प्राक्

यूरोपीय-सङ्घस्य विदेशनीति-प्रमुखस्य भ्रमणम् अभवत्, यतः सोमवासरे गणतन्त्रदिवसस्य समारोहे उभौ मुख्यातिथी भविष्यतः। नेतारौ अस्मिन् मासे सप्तविंशति दिनाङ्के प्रधानमन्त्रिणा नरेन्द्रमोदिना सह षोडशतमे भारत-यूरोपीयसङ्घस्य शिखरसम्मेलने सह-अध्यक्षतां करिष्यतः।

------------------------------------

## राष्ट्रपतिः सम्बोधनम्

राष्ट्रपतिपदासीना द्रौपदीमुर्मुः सप्तसप्ततितमस्य गणतन्त्र दिवसस्य पूर्वसन्ध्यायां राष्ट्रम् श्वः सम्बोधयिष्यति। सम्बोधनमिदं आकाशवाणी - दूरदर्शनयोः सर्वासु वाहिनीषु हिन्दी - आंग्ल-भाषयोः सायं सप्तवादने प्रसारयिष्यते। दूरदर्शन वाहिन्यां हिन्दी- आङ्ग्ल- भाषयोः सम्बोधनस्य प्रसारणानन्तरम् दूरदर्शनस्य क्षेत्रीय-वाहिनिभिः प्रादेशिक भाषासु प्रसारणं भविष्यति। आकाशवाणी रात्रौ सार्ध-नववादने क्षेत्रीय-भाषा-संस्करणस्य अस्य प्रसारणं करिष्यति।

------------------------------------

## जम्मू-कश्मीर्

जम्मू-कश्मीर्-प्रदेशे, रक्षासैन्यबलेन ह्यः कठुवा-जनपदस्य बिलावर-क्षेत्रस्य उपरिभागे स्थितस्य परहेतर-ग्रामे जैश्-ए-मोहम्मद् इत्यस्य आतङ्की-सेनापतिः पाकिस्तानी-आतङ्कवादी उस्मान् उत अबू माविया च मारितः। जम्मू-क्षेत्रस्य आरक्षि-महानिरीक्षकः भीम सेन टूटी इत्येषः अवदत् यत् बिलावर-नगरस्य सामान्यक्षेत्रे संयुक्त-अभियानावधौ भयोत्पादकः गोलिका-प्रहारे मारितः।

------------------------------------

## बालिका दिवस:

अद्य अन्तार्राष्ट्रीय बालिका दिवसो विश्विस्मन् हि विश्वे आचर्यते। दिवसोऽयं लैंगिंक समानया:, शिक्षाया: अवसरानां च महत्वं प्रकाशयति। अन्तर्राष्ट्रीय बालिकादिवस: बालिकानां सशक्तिकरणस्य तासां मानवाधिकारस्य सुरक्षाया: अद्यत्वे आवश्यकतां च प्रकाशयति।

दिवसोयं प्रतिवर्षं जनवरीमासस्य चतुर्विंशोदिनाङ्के आचर्यते। समानावसराणां सृजनं, लैङगिक भेदभावम् अपाकर्तुं, अपि च एतादृशस्य वातावरणस्य विनिर्माणं यत्र बालिका: सशक्ता:

भूयासु:, एतत् सर्वमपि दिवसास्यास्य उद्देश्यानि वर्तंते। अवसरेऽस्मिन् भाषमाण: गृह मंत्री अमित शाह: अवोचत् यत् बालिका: केवलं दायित्वरूपेण न सन्ति अपितु राष्ट्रनिर्माणे अमूल्य शक्ते: प्रतिनिधित्वं कुर्वन्ति। मिहला: देशस्य प्रगत्यै नेतृत्वं च कुर्वत्य: सन्ति।

------------------------------------

## सुरेश-रोजगार

केन्द्रीय पर्यटन राज्य मन्त्री सुरेश गोपी अब्रवीत् यत् राष्ट्रीय रोजगार मेलाया: उद्देश्यं यूवभ्य: उत्तमावसराणां प्रदानं वर्तते। मंत्री अद्य तिरूवनंतमपुरम इत्यस्य पल्लीपुरम, सी-आर-पी-एफ ग्रुप सेंटर इत्यत्र आयोजिते रोजगार मेला कार्यक्रमे भागं गृहीतवान्। श्री गोपिना सबलं कथितं यत् एता: नियुक्तय: न केवलं यूनां भविष्यं सुरक्षितं करोति वरं तेभ्य: राष्ट्रं प्रति दायित्वमपि यच्छति।

------------------------------------

## डॉ.एल.मुरूगन- रोजगार मेला

सूचना एवं प्रसारण मन्त्री डा. एल.मुरूगन वर्य: अद्य उक्वान् यत् नरेन्द्रमोदिन: नेतृत्वे प्रशासनं कृत्यवसर प्रदानेन यूनां कल्याणाय नूतनपदक्षेपा: समुत्थापिता:। मन्त्रिणा अद्य चेन्नईया: अवडी इत्यत्र सी.आर.पी.एफ. इत्यस्य एकस्मिन् कार्यक्रमे केन्द्रीय मंत्रालयनां विभागानां च अभ्यर्थिभ्य: नियुक्तिपत्राणि प्रदत्तानि। देशोऽयं विकसितभारतं प्रति एति। इति कथयन् डा. मुरूगन: उक्तवान् यत् सप्तचत्वारिंशदधिक द्विसहस्रतमे वर्षे भारतं महाशक्तित्वेन निष्चप्रचं भाति।

------------------------------------

## उत्तरप्रदेश-स्थापनादिवस

अद्य उत्तरप्रदेशराज्यस्य स्थापनादिवसस्य अवसरे राष्ट्रपतिः द्रौपदी मुर्मुः, उपराष्ट्रपतिः सी. पी. राधाकृष्णनः, प्रधानमन्त्री नरेन्द्रमोदी च उत्तरप्रदेशस्य जनानां कृते शुभाशयाः प्रेषितवन्तः। सामाजिकान्तर्जालीये सन्देशे राष्ट्रपतिः मुर्मुः अवदत् यत्, गौरवपूर्ण-इतिहासस्य समृद्ध-संस्कृतेः च भूमिः भारतस्य विकासयात्रायाः दृढः स्तम्भः अस्ति इति।

------------------------------------

## उपराष्ट्रपति-कर्पूरी-ठाकुरः

उपराष्ट्रपतिः सी. पी. राधाकृष्णन् वर्यः अद्य भारतरत्न-कर्पूरी-ठाकुर-वर्यस्य जन्मदिवसस्य अवसरे श्रद्धाञ्जलिम् अर्पितवान्। सामाजिकान्तर्जालीये सन्देशे उपराष्ट्रपतिः श्री-ठाकुरं साक्षात् जननायकः इति वर्णितवान्, तस्य सरलतायाः, सत्यनिष्ठायाः, वञ्चितानां उत्थानाय अविचलप्रतिबद्धतायाः च कृते स्मरणं कृतवान्।

------------------------------------

## क्रिकेट: पुरूष

अण्डर-19 पुरूष विश्वकप क्रिकेट् क्रीडायां न्यूजीलैण्ड दलेन सह भारतं स्पर्धते। इयं हि क्रीडा जिंबावे इत्यत्र प्रचलति।

------------------------------------

## क्रिकेट: महिला

महिला-प्रीमियर्-लीग्-क्रीडा शृङ्खायां, रॉयल चैलेंजर्स बैंगलुरू दलं देहली-कैपिटलस दलं वडोदरा-नगरे अद्य सायं सार्द्ध सप्तवादने सम्मुखी करिष्यति।

।। इति वार्ताः ।।